# Shankarashtakam

# શઙ્કરાષ્ટકમ્

## Document Information

Text title : shankarAShTakaM 1 brahmAnandavirachitam

File name : shankarAShTakam.itx

Category : aShTaka, shiva, brahmAnanda

Location : doc_shiva

Transliterated by : Kaushal S. Kaloo

Proofread by : Kaushal S. Kaloo

Description-comments : Swami Brhmanananda

Latest update : April 17, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Shankarashtakam

# શઙ્કરાષ્ટકમ્

શ્રીગણેશાય નમઃ ।

શીર્ષજટાગણભારં ગરલાહારં સમસ્તસંહારમ્ ।
કૈલાસાદ્રિવિહારં પારં ભવવારિધેરહં વન્દે ॥ ૧॥

ચન્દ્રકલોજ્જ્વલભાલં કણ્ઠવ્યાલં જગત્ત્રયીપાલમ્ ।
કૃતનરમસ્તકમાલં કાલં કાલસ્ય કોમલં વન્દે ॥ ૨॥

કોપેક્ષણહતકામં સ્વાત્મારામં નગેન્દ્રજાવામમ્ ।
સંસૃતિશોકવિરામં શ્યામં કણ્ઠેન કારણં વન્દે ॥ ૩॥

કટિતટવિલસિતનાગં ખણ્ડિતયાગં મહાદ્ભુતત્યાગમ્ ।
વિગતવિષયરસરાગં ભાગં યજ્ઞેષુ બિભ્રતં વન્દે ॥ ૪॥

ત્રિપુરાદિકદનુજાન્તં ગિરિજાકાન્તં સદૈવ સંશાન્તમ્ ।
લીલાવિજિતકૃતાન્તં ભાન્તં સ્વાન્તેપુ દેહિનાં વન્દે ॥ ૫॥

સુરસરિદાપ્લુતકેશં ત્રિદશકુલેશં હૃદાલયાવેશમ્ ।
વિગતાશેષક્લેશં દેશં સર્વેષ્ટસમ્પદાં વન્દે ॥ ૬॥

કરતલકલિતપિનાકં વિગતજરાકં સુકર્મણાં પાકમ્ ।
પરપદવીતવરાકં નાકઙ્ગમપૂગવન્દિતં વન્દે ॥ ૭॥

ભૂતિવિભૂષિતકાયં દુસ્તરમાયં વિવર્જિતાપાયમ્ ।
પ્રમથસમૂહસહાયં સાયં પ્રાતર્નિરન્તરં વન્દે ॥ ૮॥

યસ્તુપદાષ્ટકમેતદ્બ્રહ્માનન્દેન નિર્મિતં નિત્યમ્ ।
પઠતિ સમાહિતચેતાઃ પ્રાપ્નોત્યન્તે સ શૈવમેવ પદમ્ ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં શ્રીશઙ્કરાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

*Shankarashtakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*